राज्ञामन्तःपुररक्षके षण्डे (खोजा) अमरः । “नष्टं वर्षवरैरिति” रत्नावली ।

**वर्षवृद्धि** पु० वर्षस्य वृद्धिरधिकता यस्मिन् । १जन्मतिथौ २तद्दिनकर्त्तव्ये पूजादौ च । “युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता” ति०त० । “तत्कृत्यं च मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन सावकाशत्वात् न च सौरमासीयं तथात्वे तत्तिथेः कदाचिदप्राप्तौ तद्वर्षे तत्कृत्यलोपापत्तेः न चेष्टापत्तिः “प्रतिसंवत्सरं चैव कर्त्तव्यश्च महोत्सवः” ब्रह्मपु० प्रतिसंवत्सरं तद्विधानात् ति० त० रघु० । अधिकं जन्मतिथिशब्दे दृश्यम् ।

**वर्षा** स्त्री ब०व० । वर्षन्ति मेघा अत्र । श्रावणभाद्रात्मके मासद्वये ऋतौ “नभश्च नभस्यश्च वार्षिकावृतू” यजुःश्रुतिः “वर्षासु च मघासु च” मनुः ।

**वर्षाङ्गी** स्त्री वर्षासु अङ्गमस्याः । पुनर्नवायाम् शब्दर० ।

**वर्षापगम** पु० वर्षाणामपगमो यत्र । १शरत्काले हेम० । २वर्षासमाप्तौ ।

**वर्षाभव** पु० वर्षासु भवति भू–अच् । रक्तपुनर्नवायाम् राजनि० ।

**वर्षाभू** पु० वर्षासु भवति भू–क्विप् । १भेके अमरः २इन्द्रगोपे राजनि० ३महीलतायाम् मेदि० ४पुनर्नवायां ५भेक्याञ्च स्त्री मेदि० अमरे भेक्याम् गौरा० ङीष् वर्षाभ्वीत्येव ६वर्षाभवमात्रे त्रि० । [ङीष् ।

**वर्षामद** पुंस्त्री० वर्षासु माद्यति मद–अच् । मयूरे स्त्रियां

**वर्षिष्ठ** त्रि० अतिशयेन वृद्धः इष्ठन् वर्षादेशः । अतिशयवृद्धे

**वर्षीयस्** त्रि० अतिशयेन वृद्धः वृद्ध+ईयसुन् वर्षादेशः । अतिवृद्धे अमरः स्त्रियां ङीप् ।

**वर्षुक** त्रि० वृष–उकञ् । वर्षणशीले । [अमरः ।

**वर्षोपल** पु० वर्षस्य वृष्टेरुपलः प्रस्तर इव । करकेषु (शिल)

**वर्ष्मन्** न० वृष–मनिन् । १देहे २प्रमाणे च अमरः । ३अतिसुन्दरे त्रि० । [अववर्हत् त ।

**वर्ह** वधे सक० दीप्तौ अक० चु० उभ० सेट् । वर्हयति-ते

**वर्ह** उत्कर्षे भ्वा० आ० सक० सेट् । वर्हते अवर्हिष्ट ।

**वर्ह** न० वर्ह–अच् । मयूरपिच्छे अमरः अस्य पुंस्त्वमपि “कं हरेदेष वर्हः” विक्रमो०प्रयोगात् । २ग्रन्थिपर्णे वृक्षे भरतः । ३पत्रे शब्दर० ।

**वर्हि(र्हिः)कुसुम** न० वर्हिःवह्निरिव कुसुममस्य पृषो० वा सलोपः । ग्रन्थिपर्णे शब्दमा० ।

**वर्हिःपुष्प** न० वर्हिः वह्निरिव पुष्पमस्य । ग्रन्थिपर्णे भरतः

**वर्हिःशुष्मन्** पु० वर्हिः कुशः शुष्म बलमस्य । १वह्नौ अमरः कुशेन हि वह्निरुद्दीप्यते ।

**वर्हि(र्हिः)ष्ठ** न० वर्हिरिव तिष्ठति स्था-क वा विसर्गलोपः षत्वम् । ह्रीवेरे अमरः । [दृनि । वर्हीत्यप्यत्र ।

**वर्हिण** पुंस्त्री० वर्हमस्त्यस्य इन ।१मयूरे अमरः स्त्रियां ङीष्

**वर्हिर्ज्योतिस्** पु० वर्हिषा कुशेन ज्योतिरस्य । वह्नौ हेम० ।

**वर्हिर्मुख** पु० वर्हिर्वह्निर्मुखं यस्य । देवे अमरः । तद्द्वारैव हि देवा हविरश्नन्ति ।

**वर्हिषद्** पु० ब०व० वर्हिषि विप्रपाणिस्थेऽग्नौ सीदन्ति वर्हिस्सद–क्विप् पृषो० । पितृगणभेदे “अग्निष्वात्ता वर्हिषद ऊष्मपा आज्यपास्तथा” मनुः । [वह्नौ ।

**वर्हिष्केश** पु० वर्ह–दीप्तौ इसुन् वर्हिः दीप्तिमान् केशो यस्य

**वर्हिस्** स्त्री वृहि-इसुन् नि० नलोपश्च । १वह्नौ मेदि० “वर्हिषि रजतं न देयम्” श्रुतिः । २ग्रन्थिपर्णे ३चित्रके च (चिते) अमरः । ३कुशे पु०न० “वर्हिर्देवसदनम्” श्रुतिः वर्ह–दीप्तौ इसुन् । ४दीप्तियुक्ते त्रि० । [वा ग्रटा० ।

**वल** संवरणे भ्वा०आत्म०सक०सेट् । वलते अवलिष्ट । ववलतुः

**वल** न०वल्यतेऽनेन वल–क । सैन्ये रायमु० बलशब्दार्थे च ।

**वलक्ष** पु० वल-क्विप् अक्ष–अच् कर्म० । १धवले वर्णे २तद्वति त्रि० अमरः ।

**वलन** न० वल–भावे ल्युट् । १सम्वरणे त्रि०शि० उक्ते दृक्कर्मादिसंस्काराङ्गे २कदम्बयाम्योत्तरयोरन्तर तत्स्वरूपादिकं तत्रोक्तं प्रदश्यते

“तुलाजाद्योर्हि संपाते विषुवत्क्रान्तिवृत्तयोः । स्यातां याम्योत्तरे भिन्ने परक्रान्त्यन्तरे च ते । आयनं वलनं तत्र जिनांशज्यासमं ततः । एकैवायनसंधौ तु तयोः स्याद्दक्षिणोत्तरा । एकैव तद्वशात् प्राची तत्र नो वलनं ततः । तदन्तरेऽनुपातेन खेटकोटिक्रमज्यका । जिनज्याघ्नी द्युजीवाप्तायनदिग्वलनं भवेत् । एवमेव हि संपाते विषुवत्सममण्डलयोः । उन्मण्डलं भवेत् तत्र विषुवद्दक्षिणोत्तरा । क्षितिजं सममण्डलस्य पलज्या च तदन्तरम् । क्षितिजेऽक्षज्यया तुल्यमक्षजं वलनं ततः । तयोरैकैव याम्योदङ्न मध्ये वलनं ततः । नतक्रमज्यया साध्यमन्तरे त्वनुपाततः । नतं खाङ्काहतं भक्तं द्युदलेनाप्तभागकैः । क्रमज्याक्षज्यया क्षुण्णा द्युज्याभक्ताक्षजं भवेत् । प्राक् सौम्यं पश्चिमे याम्यं तच्चापैक्यान्तरात् स्फुटम् । एवमेव च संपातो यः क्रान्तिसमवृत्तयोः । परमं तत्र तत्कालवलनैक्यान्तरं स्फुटम् ।